Nyā Rat, 19:5

ब्राह्मणत्व
(*brāhmaṇatva*)
brahminhood.
Nyā Lī Kaṇ, 227:14

भ

भक्ति
(*bhakti*)
figurative usage, immediate sequence,
कापुनरियं भक्तिः? आनन्तर्यं भक्तिः।
Nyā Sū BhL, 248:3
भक्तिर्नाम अतथाभूतस्य तथाभाविभिः सामान्यम्, उभयेन भज्यत इति भक्तिः, यथा वाहीकस्य मन्दामन्तःसंज्ञामुपादाय वाहीको गौरिति।
Nyā Sū Bhā Vār (Nyā. Dar); 504:13-15;
(Nyā Dar); 245:9-11;
Vai Upa, on V.S.7.2.6.;
P. 402; Kir, 301; Pa Vā Ra, 435

भगवज्ज्ञान
(*bhagavajjñāna*)
knowledge of God
Maṇ Ka, 54:10

भगवत्सङ्केत
(bhagavatsaṅketa)
desire of God to establish the word- meaning relationship.
Śak Vā, 80:8; Śak Vā, 90:7;
Śak Vā, 45:3; Śak Vā, 8:3

भगवदिच्छा
(bhagavadicchā)
desire of God that establishes the word-meaning relationship.
Śak Vā, 41:7; 52:13

भगवान्
(bhagavān)
god, the supreme lord of the Unirerse.
Maṇika, 72:10

भदन्तसिद्धान्त
(bhadantasiddhānta)
bauddha doctrine,
Nyā Mañ, 28:21

भय
(bhaya)
fear
भयञ्च परतोऽनिष्टसम्भावना।
Nyā Pra, 133:18

भवन
(bhavana)
creative function
उत्पत्त्यनुकूलो व्यापारः।
according to the vaiyākaraṇas
Nyā Ko.

भविष्यत्
(bhaviṣyat)
future (time)
That is called future (time) of that which delimits the time by the pre-absence of that.
यत्प्रागभावेन यः कालोवच्छिद्यते स तस्य भविष्यत्कालः।
Vai upa, 2.2.8.

भविष्यत्व
(bhaviṣyatva)
the state of being a future is the state of being a counter-positive of the pre absence of present.
वर्त्तमानप्रागभावप्रतियोगित्वम् भविष्यत्वम्।
Nyā Pra, 59:16; Tar Saṁ Dī Pra, 90

भाक्त
(bhākta)
secondary usage (of a word)
Nyā Sū Bhā Vār, 245:7-12;
Akhā Vā, 25:2
Secondary usage of a word.
Nyā Pra, 70:17

भागवत्त्व
(bhāgavattva)
the state of a portion possessing
भागवत्वं सावयवात्वम्।
Nyā Lī kaṇ, 266:8

भागासिद्ध
(bhāgāsiddha)
partially unestablished fallacious reason.
भागासिद्धोऽपि स्वरूपासिद्ध एव।
Tar Bhā, 208:1.
हेतोः पक्षैकदेशावृत्तित्वेन भागासिद्धः।
Nyā Pra, 98:16; Nyā Bhū, 311:16;
Nyā Sā, 27:1
See *Svarūpāsiddha*

भागासिद्धत्व
(bhāgāsiddhatva)
the state of being a fallacious ground.
Nyā Lī Vi, 107:4

भागासिद्धि
(bhāgāsiddhi)
a fallacy partially non-existent reason on the subject.
Tat Ci Gā, 545: 23; Tat Ci Gā Dī, 105:11; Tat Cī, 540
पक्षतावच्छेदकसामानाधिकरण्येन हेत्वभावः। *(Nyā Ko)*

भान
(bhāna)
knowledge,
भानं -विषयता
Nyā Si Mu Dī, 207:19; Vyū Vā, 31; Vyū Vā, 35; Tat Ci, 865:8; Akhyāvā, 3:6; Śak Vā, 35:9; Tat Saṁ Dī Pra, 208:19; Tar Saṁ Dī Pra, 226:3

भाव
(bhāva)
1) Positive (entity), There are 6 types of positve entities.
   ननु पदार्थो द्विविधः भावोऽभावश्च।
   Nyā Si Mu Kir, 24:24; Tar Kā 3
2) Relationship, notion, nature,
   भावो = धर्मः सम्बन्ध इति यावत्
   Nyā Si Mu Kir, 66:20
3) Strong internal desire
   अन्तर्निगूढेच्छा भावः।
   Prā Pā bhā, 250:8.
4) Action (according to the grammarians.)
   भावः क्रिया।
   Pa Vā Ra, 609:5
   भावपदेन भावनाया अभिधानात्।
   Pa Vā Ra, 543:1

भावकार्य
(bhāvakārya)
positive effect
Tat Ci, 1963:15; Tat Ci, 2023; Padā Ta Nī,39:1; Padā Maṇ, 2:13

भावकृत
(bhāvakṛta)
caused by *bhāva*
Ākhyā Vā, 19:2

भावाक्त
(bhāvākta)
Secondary
Śa Śa Pra, 351:14

भावत्व
(bhāvatva)
The state of being a positive entity.
सन्नितिप्रतीतिविषयो भावत्वमेव, अतएव सामान्यादिष्वपि सदितिव्यवहारः।
Nyā Si Mu Dī, 60:8; Nyā Si Mu, 24:1
स्वरूपसम्बन्धेन - समवायावच्छिन्नसत्तासम्बन्धित्व स्वसमवायिसमवेतत्वसम्बन्धावच्छिन्नसत्ता सम्बन्धित्व स्वसमवायि (संसर्गत्वाख्य) विशेषणतासम्बन्धावच्छिन्नसत्ता सम्बन्धित्वैतदन्यतमवत्वरूपम् भावत्वमित्यर्थः।
Nyā Si Mu Kir, 25:6
the state of being existent is the state of being related to that which has existence.
सत्तासम्बन्धित्वं भावत्वम्।
Nyā Si Dī, 125:16
नन्वभावत्वावच्छिन्नप्रतियोगिताकाऽन्योन्याभाववत्वमेव भावत्वम्,
Nyā Lī Kaṇ, 780:8
सत्तासम्बन्धज्ञानविरोधि प्रकारशून्यत्वं भावत्वम्।
Nyā Lī Pra, 795:7
सत्ताविशेष्यत्वं भावत्वम्,
Nyā Lī Pra, 795:10
सत्ताप्रकारकज्ञानविषयत्वं भावत्वम्,
Nyā Lī Kaṇm 752:12; NyāSi Dī, 5:8, 8:12, 9:14

भावत्वबुद्धि
(*bhāvatvabuddhi*)
knowledge of the state of being existent.
Nyā Lī Pra, 566:13; Nyā Lī, 566:3

भावना
(*bhāvanā*)
impression
1) One of the *Saṁskāras*
संस्कारस्त्रिविधः। वेगो भावना स्थितिस्थापकश्चेति,
Tar Saṁ, 59; Tar Kā, 28
2) One of the qualities.
Pra Pā Bhā, 106:20;
Tar Saṁ Nyā Bo, 11:16
3) An efficient cause that promotes remembrance produced by experience.
अनुभवजन्या स्मृतिहेतुर्भावनात्ममात्रवृत्तिः।
Tar Saṁ, 59
भावनाख्यस्तु संस्कार आत्ममात्रवृत्तिरनुभवजन्यः स्मृतिहेतुः। *Tar Bhā, 176:3*
अनुभवजन्यत्वे सति स्मृतिहेतुत्वं भावनाया लक्षणम्।
Tar Saṁ Nyā Bo, 60:4; Tar Kau, 54:4; Nyā Pra, 76:18; Tar Kā, 28,52; Nyā Mañ, 309:6; 308:32
That saṁ kāra produced by a knowledge.
4) ज्ञानजः संस्कारो भावना
Saptapadā, 129:14
5) Action (mental)
धात्वर्थव्यापार एव भावनोत्पादना क्रियेति व्यपदिश्यते।
Pa Vā Ra,497:1
भावना च व्यापारमात्रोपलक्षिता, अचेतनानुरोधात्।
Ākhyā Vā, 14:4

भावनाबल
(*bhāvanābala*)
strength of the manifested thought of a mental action.
Nib (Ratna), 17:21

भावनापरिनिष्पत्ति
(*bhāvanāparinispatti*)
terminating in *bhāvanā*
Nib (Ratna), 10:8

भावनाप्रकर्ष
(*bhāvanāprakarṣa*)
excellence in mental action.
Nib (Ratnā), 10:19

भावनाप्रचय
(*bhāvanāpracaya*)
collection of the mental action or thought to be manifested. *Nyā Kan, 7:2*

भावनाविशेष्य
(*bhāvanāviśeṣya*)
the mental action as the qualificand.
Ākhyā Vā, 12:1; Ākhya Vā, 15:1; Ākhya Vā, 15:5

भावपदार्थ
(*bhāvapadārtha*)
positive entitiy,
Padā Maṇ, 36:12

भावप्रतियोगित्व
(*bhāvapratiyogitva*)
the state of being a counter-relatum of a positive entity.
Tat Ci Abhā Vā, 178:16

भावप्रत्यय
(*bhāvapratyaya*)
knowledge of positive entity.
Abhā Vā, 30:4; Tar Kā, 94

भावप्रधानत्व
(*bhāvapradhānatva*)
the state of having *bhāva* as prominent
Ta Ci Gā 938: 25

भावप्रधाननिर्देश
(*bhāvapradhānanirdeśa*)
mention of *bhāva* as prominent
Tar Saṁ Dī Pra, 212:15; Kir Va, 118:1

भावराशि
(*bhāvarāśi*)
collection of the mental action or thoughts to be manifested.
Nib (Ratna), 44:3

भावविकार
(*bhāvavikāra*)
change in the action.
changing action (which manifests step by step)
तत्र क्रियाकृतविशेषा उत्पत्तिक्षयोपचयादयो भावविकारा एव गणनीयाः ।
Pa Vā Rat, 520:14

भावविशेष
(*bhāvaviśeṣa*)
special mention of the action of covering (that refers to the knowledge of avidyā)
Pa VāRa, 503:9

भावशक्ति
(*bhāvaśakti*)
the existent power.
Pra Mā Vār, 556:2

भावि
(*bhāvi*)
future, to happen in future.
Tat Ci, 777:2

भावित्व
(*bhāvitva*)
the state of happening in future.
Śa Śa Pra, 436:8

भावोत्पत्ति
(*bhāvotpatti*)
production of an efficient cause that manifests on promotes or brings about (something) *Nyā Sū, 4.1.22*

भाव्य
(*bhāvya*)
to be accomplished, to be performed to be determined or proved.
Pa Vā Ra, 562:4

भाषा
(*bhāṣā*)
language of communication.
Speech, talk
ŚabŚak Pra. 275:10

भासमान
(*bhāsamāna*)
appearing, shining,
Pa Vā Ra,504:10; Vyu Vā, 33

भासमानत्व
(*bhāsamānatva*)
the state of being revealed
Ākhyā Vā, 16:4

भास्वरत्व
(*bhāsvaratva*)
the state of being bright,
the state of being luminous
परप्रकाशकत्वम्
Vai Upa, 2.1.3

भास्वररूपशून्यत्व
(*bhāsvararūpaśūnyatva*)
the state of the luminous or bright not possessing of colour.
Tat Ci Dī, 104:6

भिन्न
(*bhinna*)
different,
Kār Ca, 31:39; Kār Ca, 23:26; Tat Ci (Upa), 16:10; Tat Ci (Upa), 660:1

भिन्नत्व
(bhinnatva)
the state of being different
Kār Ca, 23:27; Kār Ca, 24:28

भूत
(*bhūta*)
one of the five natural elements.
पृथिव्यप्तेजोवाय्वाकाशपञ्चकं भूतपदवाच्यम्।
Tar Saṁ Nyā Bo. 11:19; Padā Tat Ni, 10:3

भूतकाल
(*bhūtakāla*)
past, that time in which something happened already.
यत्प्रध्वंसेन यः कालोवच्छिद्यते स तस्यातीत कालः।
Vai Upa, 2.2.8
विद्यमानध्वंसप्रतियोग्युत्पत्तिकत्वम्।
Tar Kā, 4.11; (Nyā Ko).

भूतत्व
(*bhūtatva*)
the state of being *bhūta*
भूतत्वं नाम बहिरिन्द्रियग्राह्यविशेषगुवत्त्वम्।
Tar Saṁ Nyā Bo, 11:18; Nyā Si Mu Kir, 47:9
पृथिव्यादिपञ्चानां भूतत्वम्,
Tar Kā, 25
आकाशे मूर्त्तत्वात्यन्ताभावसमानाधिकरणम्भूतत्वम्।
Nyā Pra, 79:5
मूर्त्तत्वंतु स्पन्दसमवायिकारणतावच्छेदको जातिविशेषः, भूतत्वमपि तदेव।
Padā Ta Ni, 26:1

भूतत्वसङ्कर
(*bhūtatvasaṅkara*)
a mixture of the properties of *bhūtas*
Tar Dī Pra, 57:1

भूतधारकत्व
(*bhūtadhārakatva*)
Tat Ci Gā, 3:20

भूतार्थ
(*bhūtārtha*)
poritive entity
भूतः सदभूतोऽर्थः।
Nyā Bi Ṭr, 67:3

भूतार्थवाद
(*bhūtārthavāda*)
statement of facts
तत्काले तद्गुणज्ञापकः शब्दो भूतार्थवादः।
Nyā Pra, 101:20

भूतावेशन्याय
(*bhūtāveśanyāya*)
the maxim of entering into a living being of a ghost.
Tat Ci, 1999:3

भूयोदर्शन
(*bhūyodarśana*)
perceptual knowledge of probans and probandum residing in one locus again and again.
Tat Ci Gā, 635:1; Tat Ci Gā, 635:12; Tat Ci, 648:26; Tat Ci, 722:3

भेद
(*bheda*)
difference, relation of difference.
Kār Ca, 25:30; Kār Ca, 51:66; Tat Ci, Upa, 5:4

पदार्थयोरन्वयो द्विविधोऽभेदो भेदश्च,
Pa Vā Ra, 233
भेदश्चान्योन्याभावस्तज्ज्ञानं च प्रतियोगिज्ञानाधीनम्।
Nyā Pra, 49:4

भेदक
(*bhedaka*)
that which causes a difference, that which indicates a difference.
Nyā Ko

भेदकत्व
(*bhedakatva*)
the state of being the indicator of a difference
Tat ci, 1092:6

भेदग्राहक
(*bhedagrāhaka*)
that which reveals the difference.
Nyā Lī Vi, 113:3

भेदत्व
(*bhedatva*)
the state of being different
Vā Vā, 74:26; Vyu Vā, 35; Vyu Vā, 32

भेदसम्बन्ध
(*bhedasambandha*)
the relationship of difference.
Tar Saṁ Di Rā, 344:4

भेदाग्रह
(*bhedāgraha*)
the non-knowledge of difference
भेदाग्रहस्तु बुद्धिसान्निध्याख्यदोषदेवेति बोध्यम्
Nyā Si Mu Rā, 168:28; Nyā Si Dī, 95:5; Nyā Si Dī, 93:6; Tat Ci, 530

भेदाभेदवाद
(*bhedābhedavāda*)
the doctrine of simultaneous dualism and non dualism, the theory of difference and non-difference.
Pa Vā Ra, 567:3; Tat Ci, 677:8, 678:7; Tat Ci Abhā Vā, 178:1; TatCi Upa, 6:22

भोग
(*bhoga*)
1. enjoyment
सुखदुःखान्यतरसाक्षात्कारो भोगः।
Nyā Pra, 51:20; Tar SaṁDī, 7:10; Tar Kau, 6:10; Tar Bhā, 125:3
स्वसमवेतसुखदुःखान्यतरसाक्षात्कारो भोगः।
Sapta Padā, 91:15
2) fruition
फलं भोगः।
Tar Saṁ Dī, 64:12

भोगाधार
(*bhogādhāra*)
basis or locus of enjoyment.
Tat Ci, 1424:11

भोगायतन
(*bhogāyatana*)
locus of enjoyment
Nyā Ko

भोगाश्रय
(*bhogāśraya*)
substratum or locus of enjoyment.
Tar Saṁ Dī Rā, 197:7

भौम
(*bhauma*)
related to *bhūmi*; a type of fire
पार्थिवमात्रेन्धनं तेजः भौमम् यथा अग्निः,
Nyā Pra, 55:7; Sapta, 94:6

भ्रम
(*bhrama*)
misapprehension, a mistake, erroneous knowledge.
तदभाववति तत्प्रकारकं ज्ञानं भ्रमः।
Nyā Si Mu, 421:8; Nyā Si Mu, 423:3-5
विपरीतनिर्णयो भ्रमः।
NyāTar Kau, 15:8
विपर्ययो नाम भ्रम इत्यर्थः। *Tar Saṁ, 57:9*
संसर्गाग्रहो भ्रमः।
Tat Ci, Śabda, 129:5

भ्रमत्व
(*bhramatva*)
the state of being an erroneous knowledge.
भ्रमत्वं प्रमेतरज्ञानत्वम्,
Tat Ci Śabda, 97:7; Tat Ci, 107; Vā Vā, 132:33; Ara Nijā, 43:6; Ara Nijā 154:9

भ्रमण
(*bhramaṇa*)
movement, action in circular way.
भ्रमणम् -प्रसिद्धमश्वादेश्चक्राकारधावनम्,
Nyā si Mu Kir, 41:27; Pra Pā Bhā, 15:4; Tar Saî Dī, 5; Tar Saṁ Pra, 62

भ्रमणत्व
(*bhramaṇatva*)
the state of being movement
अधः संयोगजनककर्मत्वं भ्रमणत्वम्।
Nyā Lī Kaṇ, 680:9
नानादिक्संयोगजनकनानाजातीयनानाकर्मत्त्वं भ्रमणत्वम्।
Nyā Lī Pra, 679:15

भ्रान्त
(*bhrānta*)
one who has misaprehension, one who has wrong or erroneous knowledge
Tat Ci, 647:; Śak Vā, 121:1

भ्रान्तत्व
(*bhrāntatva*)
the state of being a *bhrānta*
Nyā Si Dī, 9:9; Nyā Si Dī, 9:14; Maṇ ka, 74:3

भ्रान्ति
(*bhrānti*)
error, a wrong notion.
Tar Saṁ NyāBo, 5:6; Kir Va, 12:9

भ्रान्तिदर्शन
(*bhrāntidarśana*)
seeing or knowing an erroneous knowledge.
Nyā Ko

म

मङ्गल
(*maṅgala*)
benediction, an auspicious beginning which causes the completion of a text.
चिकिर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारानुमितश्रुतिबोधितकर्त्तव्यताकमिष्टदेवतानमस्कारलक्षणं मङ्गलं शिष्यशिक्षार्थं निर्विघ्नश्चिकीर्षितं ग्रन्थादौ प्रतिजानीते,
Tar Saṁ, 1
निर्विघ्नपरिसमाप्तिः अर्थः फलं यस्य तत् तथाभूतं मङ्गलमित्यर्थः। *Tar Saṁ Tar Dī Rā, 84:8*
अभिमतकर्मारम्भसमये कर्मसमाप्तिकामाः शिष्टा मङ्गलमाचरन्ति। तत्र मङ्गलं समाप्तिं प्रति कारणम्
Maṇ Ka, 2:3
मङ्गलं सन्दिग्धाकारकर्त्तृकम्।
Tat Ci Rah, 41:17
मङ्गल स्वापकर्षबोधानुकूलव्यापारात्मकम्।
Nyā Si Mu Kir, 6:22
मङ्गललक्षणन्तु - विघ्नभिन्नत्वे सति विघ्नध्वंसप्रतिबन्धकाभावभिन्नत्वे सति प्रारिप्सित (ग्रन्थ) विघ्नध्वंसाऽसाधारणकारणत्वम्। *Nyā Si Mu Kir, 7:10*

मङ्गलत्व
(*maṅgalatva*)
the state of being an auspicious beginning which removes difficulties while starting any work (to be accomplished)
एवं विघ्नोत्सारणाऽसाधारणकारणत्वे सति साध्यत्वमेव मङ्गलत्वम्
Nyā Si Dī, 3:21
आशीर्वादनमस्कारवस्तुनिर्देशान्यतमत्वम्।
Nyā Si Mukir, 7:14
समाप्तिप्रतिबन्धकीभूतदुरितविशेषध्वंसहेतुत्वम् वा मङ्गलत्वमिति।
Nyā Si Mu Kir, 7:15
निर्विघ्नमारब्धं परिसमाप्यताम् इति कामनया वेदविहितत्वम्। *Tat Ci (Nyā Ko)*

मण्डन
(*maṇḍana*)
the act of decorating or ornamenting oneself.
शोभाविशेषोत्पत्तिर्मण्डनम्। *Nyā Pra, 109:10*

मण्डुकवसाञ्जनदोष
(*maṇḍukavasāñjanadoṣa*)
a kind of defect
Tat Ci, 321

मतानुज्ञा
(*matānujñā*)
a kind of *nigrahasthāna* in which one does not quote one's fault but of others.
स्वपक्षे दोषाभ्युपगमात् परपक्षे दोषप्रसङ्गो मतानुज्ञा,
Nyā Sū, 5.2.20
पराभिमतस्यार्थस्य स्वप्रतिकूलस्य स्वयमेवाभ्यनुज्ञानं स्वीकारो मतानुज्ञा,
Tar Bhā, 221:7
दूषणबुद्ध्या असत्प्रसङ्गो मतानुज्ञा,
Nyā Ra, 239:5
यत्र जातित्वोद्भावनमात्मानमपि व्याप्नोतीति, प्रसञ्जिताभ्युपगमो निर्दोषः, तत्र मतानुज्ञेति।
Nyā Ra, 240:21

मति
(*mati*)
intellect, understanding, judgement.
Nyā Ko.

मत्सर
(*matsara*)
jealousy, greediness.
यदन्यस्मै निवेद्यमानमपि वस्तु धनवन्न क्षीयते तदपरित्यागेच्छा मत्सरः।
Nyā Mañ, 71:2

मधुर
(*madhura*)
pleasant, sweet, attractive, agreeable, one type of rasa.
Tar Saṁ, 15; Pad Maṇ, 16:4

मध्यमपरिमाण
(*madhyamaparimāṇa*)
middle size.
Tar Saṁ Dī Pra, 94:3;
Tar Saṁ Dī Rā,198:7

मध्यमवृद्ध
(*madhyamavṛddha*)
the middle person in action performed.
Tar Saṁ Dī Pra, 235:3

मध्यमा
(*madhyamā*)
a kind of speech.
Nyā Mañ, 343:20

मध्यस्थ
(*madhyastha*)
being in the middle, the middleman.
Tat Ci, 1530:20; Tat Ci Gā, 1552:13

मनन
(*manana*)

logical thinking process, meditation, reflection.

साधकबाधकप्रमाणोपन्यासरूपयुक्तिभिस्तदर्थानुचिन्तनम् मननम्,

Nyā Pra, 46:11

युक्तिभिरनुचिन्तनं मननम्,

Tar Saṁ Dī Pra, 388:3; Tat Ci, 1088:7

मनस्
(*manas*)

mind; understanding, an instrument which helps generating the knowledge of pleasure etc., the inner sense organ, a substance.

ज्ञानायौगपद्यादेकं मनः।

Nyā Sū, 3.2.56

यथोक्तहेतुत्वाच्चाणु मनः,

Nyā Sū, 3.2.59

मनसः इन्द्रियत्वादिन्द्रियार्थसन्निकर्षोत्पन्नं सुखादिज्ञानम् इति।

Nyā Sū Bhā Vār, 40:10-14

यत्सुखोपलम्भमिन्द्रियं तन्मनः।

Nyā Lī, 328:2

द्रव्यानारम्भकनित्यवृत्तिद्रव्यत्वसाक्षाद्व्याप्य-जातिमत्वादिस्पर्शी मन इत्यर्थः।

Nyā Lī Pra, 329:7

तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्मनांसि नवैव।

Tar Saṁ, 3; Tar Kā, 3; Pra Pā Bhā, 10:8

सुखाद्युपलब्धिसाधनमिन्द्रियं मनः, तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यं च।

Tar Saṁ, 13; Tar bhā, 129:1;

Nyā Pra 64:8

मनः परमाणुरूपम्।

Tar Kā, 6

साक्षात्कारे सुखादीनां करणं मन उच्यते।

Nyā So Mu, 360:1

मनस्त्वजातियोगि स्पर्शशून्यं क्रियाधिकरणं मनः।

Sapta padā, 68:22

मनस्त्वसामान्यवन्मनः।

Tar Kau, 9:5

अन्तरिन्द्रियं मनः।

Tar Bhā, 191:4

स्पर्शरहितत्वे सति क्रियावत्त्वं मनसो लक्षणम्।

Tar Saṁ Dī, 13

मनस्त्व
(*manastva*)

the state of being an internal instrument of knowledge. The class of mind as an inner sense-organ.

मनस्त्वं च मूर्त्तत्वे सति इन्द्रियत्वेनासाधारणजातिमत्वान्मनसः कथमन्यथा सुखाद्युपलब्धि-साधकतमत्वम्।

Nyā Lī, 802:4;

Nyā Sī Dī, 26:1

मनोग्राह्यगुणत्व
(*manogrāhyaguṇatva*)

the state of being a quality which is known through mind.

Nyā Ko.

मनोविज्ञान
(*manovijñāna*)

mental perception. (Buddhist)

स्वविषयानन्तरविषयसहकारिणेन्द्रियज्ञानेन समनन्तरप्रत्ययेन जनितं तन्मनोविज्ञानम्।

Nyā Bin, 1.9; Nyā Bi, 179:4

मन्त्र
(*mantra*)

vedic invocations to God

सत्यतपःशालिनां वचनं मन्त्रः।

Ātmvi, 435:1

सत्यवादिनां महर्षिणां वाच एव मन्त्राः।

Atm Vi (comm.1) 435:9

A mantra is that type of Vedic sentence which causes to recollect the meaning of the offerings to be given as oblations to Devatā of a sacrifice.
Nyā Pra, 101:14

मरण
(*maraṇa*)
death,
1. The ultimate destruction of the contact between the body and the breath is called death.
   चरमप्राणशरीरसंयोगध्वंसः मरणम्।
   Nyā Si Mu Dī, 31:11; Nyā Si Mu Kar, 26:10; Tar Saṁ Dī Pra, 331:16; Nyā Pra, 154:12
2. Separation of body and mind.
   शरीरमनोविभागः
   Vai Upa, 6.2.15
3. Destruction of the invisible merit i.e. *adṛṣṭa* (both *dharma* & *adharma*).
   जीवनादृष्टनाशः। मरणं च धर्माधर्माधीनम्।
   Vai Upa, 6.2.15
4. प्रेत्यभावो मरणम्।
   Tar Saṁ Dī, 64:12

मर्यादा
(*maryādā*)
limit or boundary of time and space.
मर्यादा सीमा -कालरूपा देशरूपा च।
Nyā Pra, 127:2;
Pa Vā Ra, 780:1-2

महत्त्व
(*mahattva*)
the state of being a big size.
बहिरिन्द्रियजद्रव्यसाक्षात्कारे उद्भूतस्पर्शवत्वे सति महत्त्वम्
Nyā Si Dī, 43:17; Nyā Si Dī, 42:16;
Nyā Si Dī, 43:22

द्रव्यवृत्तिलौकिकविषयतया जन्यसाक्षात्कारो समवायेन महत्त्वम्।
Maṇ Ka, 14:11

महत् परिमाण
(*mahatparimāṇa*)
big size, large size.
One type of quantity.
यत्खलु परिमाणं रूपसहायं स्वाश्रयं प्रत्यक्षयति तत्र महदिति व्यपदेशः।
Nyā Kan, 318:7; Tar Saṁ, 18;
Pra Pā Bhā, 136:17

महत्वाधिकरण
(*mahatvādhikaraṇa*)
locus of *mahattva*
Nyā Lī, 267:4

महदण्ड
(*mahadaṇḍa*)
the big egg
एवं समुत्पन्नेषु चतुर्षु महाभूतेषु महेश्वरस्या-भिध्यानमात्रात् तैजसेभ्योऽणुभ्यः पार्थिवपर-मापुसहितेभ्यो महदण्डमारभ्यते,
Pra Pā Bhā, 64:7;
Nyā Kan, 130:1-3

महद्द्रव्यारम्भकत्व
(*mahaddravyārambhakatva*)
the state of being (a cause) of the substance which is of a big size.
Kir Va, 36:16

महाकाल
(*mahākāla*)
universal time which has no limit & which is indivisible
Maṇ Ka, 34:1; Ava Ni Jā, 119:4;
Tat Ci Gā, 246:1; Tat Ci Gā, 276:26;
Nyā Si Mu Rā, 66:20; Tat Ci Dī, 166:35

महाकालत्व
(*mahākālatva*)
the state of being the Universal time having no limit & which is indivisible.
Ava Ni Jā, 24:3; Ava Ni Jā,117:1; Maṇ Ka, 34:1; Tat Ci Gā, 246:1

महाप्रलय
(*mahāpralaya*)
final delusion, destruction of all the positive effects.
सर्व भावकार्यध्वंसो महाप्रलय इति विवेकः।
Tar Saṁ Dī, 10:10

महाभूत
(*mahābhūta*)
the primary element of creation.
Pra Pā Bhā, 60:5

महावाक्य
(*mahāvākya*)
a discourse
principal sentence,
Śa Śa Pra, 189:2
स्वघटकानेकनामलभ्यतादृशार्थबोधकं वाक्यम्
Śa Śa Pra ; (Nyā Ko)

महावाक्यार्थ
(*mahāvākyārtha*)
meaning of the primary or principal sentence.
Śa Vā, 120:1; Śa Vā, 162:1; Tat Ci Dī, 55:19; Tat Ci Dī, 31:5; Tat Ci Dī 61:25

महाव्याप्ति
(*mahāvyāpti*)
the principal invariable concomitance.
Tat Ci Dī, 1222:14

महेश्वरेच्छा
(*maheśvarecchā*)
desire of the lord Śiva (Maheśvara)
Pra Pā Bhā, 60:10

महोदय
(*mahodaya*)
honour, great achievement like attainment of *puruṣārtha*.
Nyā Kan, 6:6; Nyā Kan, 6:10; Nyā Kan, 7:2

मात्र पदार्थ
(*mātrapadārtha*)
the meaning of the word mātra.
Tar Saṁ Dī Rā, 279:9

मान
(*māna*)
measure, means of knowledge.
मानम् - प्रमाणम्
Nyā Si Mu Kir, 33:31
यथार्थानुभवो मानम्
Tat Ci Rah, 366:12; Tat Ci, 677:5; Nyā Lī, 42:1

मानस (शक्तिग्रह)
(*mānasa*) (*śaktigraha*)
mental grasp of the word - meaning relationship.
*Śak Vā, 98:6; Śak V*ā 98:8

मानसज्ञान
(*mānasajñāna*)
mental knowledge.
Tat Ci Gā, 632:24; Śak. Vā, 99:2

मानसत्व
(*mānasatva*)
the state of being mental.
Pad Maṇ, 5:1; Maṇ Ka, 28:4; Vā Vā, 72:27; Tat Ci Gā, 729:4

मानसप्रत्यक्ष
(mānasapratyakṣa)
mental Perception.
Tar Saṁ Nyā Bo, 33:15;
Tar Saṁ Nyā Bo, 30:16
मनः संयोगेन जीवात्मनो मानसप्रत्यक्षम्।
Maṇ Ka, 14:7;
Pra Mā Samu, 1.6, 92.9;
Tar Bhā, 123:2

मानसव्याप्तिग्रह
(mānasavyāptigraha)
mental grasp of invariable concomitance.
Tat ci Gā, 315:22

मानसिकत्व
(mānasikatva)
the state of being related to *manas*
मानसिकत्वन्तु मानसत्वव्याप्यो जातिविशेष एव।
Tat Ci Rah, 105:20

मानसोपनीत
(mānasopanīta)
that which is revealed by mind, presented by mind.
Vā Vā, 72:9

माया
(māyā)
false knowledge, wrong knowledge.
प्रज्ञापनीयसरूपं च द्रव्यमुपादाय साधनवान्परस्य मिथ्याध्यवसायं करोति सा माया।
Nyā Sū Bhā, 305:5

मास
(māsa)
a month having two fortnights.
द्वौ पक्षौ मासः।
Nyā Kan, 123:4

मिति
(miti)
knowledge.
Tat Ci, 558

मिथ्याज्ञान
(mithyājñāna)
false knowledge; wrong knowledge.
मिथ्याज्ञानं विपर्ययः। यथा शुक्ताविद रजतमिति,
Tar Saṁ, 56
किं पुनस्तन्मिथ्याज्ञानम्?
अनात्मन्यात्मग्रहः - अहमस्मीति मोहोऽहङ्कार इति।
अनात्मनं खल्वहमस्मीति पश्यतो दृष्टिरहङ्कार इति।
Nyā Sū Bhā, 288:1-2
अविद्याहि मिथ्याज्ञानमुच्यते।
Nyā Bhū, 581:12
अतस्मिंस्तदिति ज्ञानं मिथ्याज्ञानम्।
Nyā Mañ, 71:9
विशेष्यावृत्तिप्रकारकं ज्ञानमित्यर्थः।
Nyā Lī Pra, 761:16
मिथ्याज्ञानस्य हीदमेव तत्त्वं यत् प्रदर्शिताप्रापकत्वं नाम।
Dha Pra, 33:12

मिथ्याज्ञानध्वंसत्व
(mithyājñānadhvaṁsatva)
the state of being destruction of a false knowledge.
Nyā Si Dī, 37:19

मिथ्याज्ञाननिवृत्ति
(mithyājñānanivṛtti)
avoiding or dropping out the false knowledge.
Nyā Si Dī, 31:19

मिथ्यात्व
(mithyātva)
the state of being false.
Nib (Rat), 112:9

मिथ्याप्रत्यय
(*mithyāpratyaya*)
false knowledge, false cognition.
अस्तित्वेनाधिगते नास्तीति विज्ञानं मिथ्याप्रत्ययः।
Nyā Sū Bhā Vār, 25:9-10; Pra Pā Bhā, 176:21; Nyā Lī Vi, 456:4

मिथ्याबुद्धि
(*mithyābuddhi*)
false intellect, false understanding, false knowledge.
Nyā Sū, 4.2.37

मिथ्योपलब्धि
(*mithyopalabdhi*)
false apprehension.
Nyā Sū, 4.2.35
स्थाणौ पुरुषोऽयमिति व्यवसायो मिथ्योपलब्धिः अतस्मिंस्तदिति ज्ञानम्।
NyāSū Bhā, 304:17

मुक्त
(*mukta*)
liberated.
स्वभावनिर्मलो मुक्त इत्युच्यते।
Nyā Bhū, 571:7

मुक्तत्व
(*muktatva*)
the state of being free (from bondage) the state of being liberated
Tat Ci, 2064:17; Nyā Si Dī, 36:10; Nyā SiDī, 36:15; Nyā Si Dī 37:16

मुक्ति
(*mukti*)
liberation, freedom from bondage ; absolute absence of unhappiness and misery.
प्राञ्चस्तु दुःखात्यन्ताभाव एव मुक्तिरात्यन्तिकी दुःखनिवृत्तिरित्यनेनैव तस्य विवक्षितत्वात्।
Nyā Si Dī, 37:23
अतएव संस्काराजनकभोगविषयदुःखध्वंसः संस्काराजनकानुभवध्वंसो वा मुक्तिः।
Tat Ci, 2058:5
एवञ्च शमदमब्रह्मचर्याद्युपबृंहितयावन्नित्यनैमित्तिकसन्ध्यौपासानादिकर्मसहितात्तत्त्वज्ञानान्मुक्तिः।
Tat Ci, 2074
समानाधिकरणयुगपदुत्पन्नानेकदुःखध्वंसो मुक्तिरित्यर्थः।
Nyā Lī Kaṇ, 588:8
दुःखसाधनध्वंसविशिष्ट दुःखत्वावच्छिन्नात्यन्ताभावो मुक्तिः।
Nyā Lī kaṇ, 598:11
पापध्वंस एव मुक्तिः न दुःखध्वंस इति नोक्तानुपपत्तिः।
Nyā Si Mu Rā, 33:29
स्वसमानाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसः मुक्तिः।
Nyā Pra, 47:9

मुक्तित्व
(*muktitva*)
the state of being completely free from misery.
Nyā Si Dī, 36:11; Nyā Si Dī, 37:17

मुख्य
(*mukhya*)
primary or principal
ईश्वरेच्छाऽनधीनेच्छाविषयः मुख्यम्।
Nyā Pra, 43:21; Kār Ca, 36:45; Kār Ca, 16:17; Kār Ca, 53; Kār Ca, 20:23

मुख्य (पद)
(*mukhya* [*pada*])
a primary word which is used in a primary sense through the primary relationship.
यच्छक्तिवृत्या यमर्थमुपस्थापयति, तत्तस्मिन्नर्थे मुख्यम्।
Tar Kau, 44:9

मुख्यता
(*mukhyatā*)
primaryness.
Śak Vā, 59:10

मुख्यत्व
(*mukhyatva*)
the state of being a primary action or primary object of knowledge
Nyā Si Dī. 25:6

मुख्यफल
(*mukhyaphala*)
primary effect or main result or principal result
स्वविधेयकप्रवृत्तिप्रयोजकोत्कटेच्छाविषयीभूतं स्वस्य मुख्यं फलम् ।
Nyā Si Mu Kir, 8:5

मुख्यफलाजनकत्व
(*mukhyaphalājanakatva*)
the state of not being a producer of the primary result.
Nyā Vā 192:7

मुख्यविशेष्य
(*mukhyaviśeṣya*)
prime qualificand
Vā Vā, 73:17; Vā Vā, 73:31; Pa Vā Ra, 590:3

मुख्यविशेष्यत्व
(*mukhyaviśeṣyatva*)
the state of being a prime qualificand.
Śak Vā, 48:4

मुख्यवृत्ति
(*mukhyavṛtti*)
primary relationship between a word and its meaning primary function between a word and its meaning.
Nyā Rat, 190:5, 191:5

मुख्यार्थ
(*mukhyārtha*)
primary meaning of a word.
Śak Vā, 15:2; Śak Vā 189:11; Tat Ci Gā, 108:21; Pa Vā Ra, 435

मुख्यामुख्यवृत्ति
(*mukhyāmukhyavṛtti*)
primary & secondary function of a word and its meaning.
Nyā Ra, 236:2

मुमुक्षु
(*mumukṣu*)
one who is desirous of liberation
Tar Saṁ Dī Pra, 388:3; Tar Kā, 2; Tat Ci, 1089:8

मुहूर्त्त
(*muhūrtta*)
moment, a measure of time having thirty *kālas*.
त्रिंशत्कालो मुहूर्त्तः ।
Nyā Kan, 123:3

मूर्छन
(*mūrchana*)
producing insensibility, a particular type of contact.
समानजात्योः समानजवयोगी वाय्वोर्विरूद्ध दिक्क्रिययोः संनिपातः संयोगविशेषः ।
Nyā Ko.

मूर्त
(*mūrta*)
having limited size.
Pra Pā Bhā, 237:17; Kār Ca, 77:102

मूर्तगुण
(mūrtaguṇa)
quality of a gross substance
रूपरसगन्धस्पर्शपरत्वापरत्वगुरुत्वद्रवत्वस्नेहवेगा मूर्त्तगुणाः।
Pra Pā Bhā, 106:4;
Nyā Si Mu, 367:3-4

मूर्तगुणत्व
(mūrtaguṇatva)
the state of being quality of a substance having limited size
Nyā Si Mu Rā, 346:17

मूर्तत्व
(mūrtatva)
the state of having limited size
१. मूर्तत्वमवच्छिन्नपरिमाणयोगित्वम्।
Nyā Kan, 57:2 ; Sapta Padā 136:15
२. मूर्तत्वं च क्रियाश्रयत्वम्।
Tar Saṁ Nyā Bo, 11:18
Pra Pā Bhā, 24:3
३. परिच्छिन्नपरिमाणवत्त्वं क्रियाऽश्रयत्वं वा मूर्तत्वम्।
Nyā Pra, 58:10
तथाहि मूर्तत्वम् अवच्छिन्नपरिमाणत्वम्।
Nyā Lī Pra, 291:14
मूर्तत्वं पुनरिह परिच्छिन्नपरिमाणवत्त्वमेव, न तु क्रियाजनकतावच्छेदकतयासिद्धौ जातिविशेषः।
Nyā Si Mu Rā, 348:33
४. मूर्तत्वम् - अपकृषृपरिमाणवत्त्वम्।
Nyā Si Mu Kir, 47:12
मूर्तत्वमिति - समवायेन अपकृष्टपरिमाणवत्वमिति तदर्थः।
Nyā Si Mu Kir, 94:27
मूर्तत्वमपकृष्टपरिमाणवत्त्वम्।
Nyā Si Mu, 95:1-2
५.मूर्तत्वं तु स्पन्दसमवायिकारणतावच्छेदको जातिविशेषः।
Padā Ni, 25:4
क्रियाजनकतावच्छेदकं मूर्तत्वं जातिरित्यपि केचित्।
Nyā Si Mu Dī, 95:13
६.मनसि च भूतत्वात्यन्ताभावसमानाधिकरणम्मूर्त्तत्वम्।
Nyā Pra, 79:6

मूर्तत्वजाति
(mūrtatvajāti)
the universal residing in *mūrta*
Padā Maṇ, 8:20

मूर्तवृत्ति
(mūrtavṛtti)
existing in *mūtra / dravya.*
Nyā Si Mu Rā, 346:18; Tat Ci, 824:5

मूर्तामूर्तगुणत्व
(mūrtāmūrtaguṇatva)
being the quality of *mūrta* and *amūrta-dravya*
कालवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्त्वम्। *Nyā Ko*

मूर्तिमत्
(mūrtimat)
corporeal, material
Nyā Sū, 4.2.23

मूर्तेतरद्रव्यत्व
(mūrtetaradravyatva)
the state of being a substance other than corporcal or material
Padā Maṇ, 1:10

मृत्प्रकार
(mṛtprakāra)
of the type of earth.
Pra Pā Bhā, 42:10

मृदु
(mṛdu)
soft, tender, delicate
Tar Saṁ Dī Rā, 140:5

मृदुत्व
(*mṛdutva*)
softness, tenderness,
the state of being soft or delicate. Softness is the contact between loose parts of a substance.
शिथिलावयवसंयोगः मृदुत्वम्।
Tar Saṁ Dī Rā, 140:5;
Tar Saṁ Dī Rā 141:2; Tar Saṁ Dī, 5

मेय
(*meya*)
fit to be known, measurable
Nyā Lī, 26:1

मेयत्व
(*meyatva*)
the state of being fit to beknown or cognizable.
Tar Saṁ Dī Rā, 294:6

मेयरूपता
(*meyarūpatā*)
the state of being in the form of that fit to be known or cognizable (object of knowledge).
Nyā Bhū, 49:12

म्लेच्छव्यवहार
(*mlecchavyavahāra*)
usage of the uncultured
Tar Saṁ Dī Pra, 235:11

मोक्ष
(*mokṣa*)
liberation or final emancipation which is the absolute cessation of misery.
आत्यन्तिकदुःखध्वंसो मोक्षः।
Tar Kau, 60:1; Nyā Si Mu Kir, 26:12
आत्यन्तिकी दुःखनिवृत्तिरिति गौतमीयाः।
Nyā Si Dī, 33:7
केचित्तु दुःखात्यन्ताभाव एव मोक्षः।
Nyā Kau, 424:18
तदनन्तरं श्रुत्युपदिष्टयोगविधिना निदिध्यासने कृते तदनन्तरं देहादिविलक्षणात्मसाक्षात्कारे सति दोषाभावात्प्रवृत्त्यभावे धर्माधर्मयोरभावाज्जन्माभावे पूर्वधर्माधर्मयोरनुभवेन नाशे चरमदुःखध्वंसलक्षणो मोक्षो जायते।
Tar Saṁ Dī, 67:1
अपवर्गो मोक्षः।
Tar Saṁ Dī, 64:12
शरीरानुत्पादो मोक्षः।
Where there is no birth is liberation.
Nyā Kan, 683:6-9
प्राभाकरास्तु आत्यन्तिकदुःखप्रागभावो मोक्षः।
Tat Ci, 2065
अथाविद्यैव जीवात्मा, तस्य चानादित्वमसंख्यातत्त्वं संसारित्वं च तन्निवृत्तिश्च मोक्ष इति।
Nyā Bhū, 583:11
एके तावत् वर्णयन्ति - समस्तात्मविशेषगुणोच्छित्तौ संहारावस्थायामाकाशवदात्मनः सर्वदावस्थानं मोक्षः।
Nyā Bhū, 594:3
तस्मादविचारमणीयोऽतस्मिंतद्ग्रह एव भ्रान्तिरारोपापरनामा, तत्क्षयश्च मोक्ष इति युक्तिम्।
Nib, 138:27
प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानान्मोक्षप्राप्तिर्भवति।
Tar Bhā, 4:3

मोक्षजनक
(*mokṣajanaka*)
producer of final emancipation.
Nyā Kau. 442:13

मोक्षावस्था
(*mokṣāvasthā*)
state of liberation, state of final emancipation.
Nyā Kan, 691:10, 692:1-2

मोक्षोपाय
(*mokṣopāya*)
a means of liberation,
Nyā Mañ, 91:23

मोक्षोपायत्व
(*mokṣopāyatva*)
the state of being a means of liberation.
Tat Ci, 1089:8

मोचन
(*mocana*)
releasing, freeing from.
Releasing is the action which is the producer of disjunction.
विभागजनकव्यापारो मोचनम्।
Nyā Pra, 109:20

मोह
(*moha*)
insensibility, delusion, error, false apprechension.
वस्तुपरमार्थापरिच्छेदलक्षणो मिथ्यावसायो मोहः।
Nyā Mañ, 70:30
मिथ्याप्रत्ययो मोह इति।
Nyā Bhū, 586:8
मोहो मिथ्याज्ञानम्।
Nyā Pra, 154:9
मोहः शरीरादावात्मभ्रमः।
Tar Saṁ Dī, 64:7; Nyā Sū, 4.1.6

य

यङ्
(*yaṅ*)
a grammatical suffix used for reduplication.
यङोऽर्थः पौनःपुन्यम्।
Tar Kā, 100

यङन्त
(*yaṅanta*)
a finished form ended with the reduplicative suffix yaṅ. *Śa Śa Pra, 406:4*

यत्
(*yat*)
1) a suffix.
2) To attempt, to strive for, endeavour, try.
Nyā Ko.

यति
(*yati*)
restraint, control, a striver, an ascetic.
Nyā Bhū, 587:23

यत्न
(*yatna*)
an effort, attempt, trial.
Pa ta nī, 79:4; Nyā Si Dī, 37:7; Maṇ Ka,86:7; Nyā Si Mu, 491:1-3; Kār Ca, 15:16; Kār Ca, 21:24; Śa Śa Pra, 395:5; Ākhyā Vā, 2:2; Ākhyā Vā, 6:7

यत्नवाचकत्व
(*yatnavācakatva*)
the state of being the expressing agent of the effort or endeavour. *Ākhyā Vā, 6:1*

यत्नानुमान
(*yatnānumāna*)
inference of the effort or trial undertaken.
Ākhyā Vā, 7:3; Ākhyā Vā, 7:1; Ākhyā Vā, 6:7

यथार्थ
(*yathārtha*)
1) One type of experience (i.e. true experience) out of two types of experiences.
स (अनुभव) द्विविधो यथार्थऽयथार्थश्च।

2) Fact oriented apprehension or confirmable to truth is that which is the experience of that thing having a qualifier as possessing that qualifier (This is called valid knowledge).
तद्वति तत्प्रकारकोऽनुभवो यथार्थः।
Tar Saṁ, 23:1
तथा च तद्वद्विशेष्यक - तत्प्रकारकानुभवत्वं यथार्थानुभवस्य लक्षणम्। *Tar Saṁ Dī Pra, 115-16*

3) Try or valid experience.
स्मरणमपि द्विविधं यर्थाथमयथार्थञ्च, तद्वति तत्प्रकारकं यथार्थम्।
Tar Kā, 44; Tat Ci, 325; Tat Ci, 735:3; Nyā Lī Vi, 456:7; Maṇ Ka, 4:3

यथार्थज्ञान
(yathārthajñāna)
true or valid knowledge.
Tar Saṁ Dī Pra, 116; Nyā Lī Vi, 420:4; Nyā Ra, 24:4; Tar Saṁ Dī Rā, 292:13; Tar Saṁ Dī Rā, 292:14, 313:16

यथार्थज्ञानविषय
(yathārthajñānaviṣaya)
content of the valid knowledge.
Tat saṁ Dī Rā, 292:10

यथार्थत्व
(yathārthatva)
the state of being valid
फलवत्प्रवृत्तिजननयोग्यत्वं च यथार्थत्वम्।
Tar Kau, 15:11; Tar Bhā, 117:1; TAt Ci, 366

यथार्थबुद्धि
(yathārtha buddhi)
valid knowledge.
तद्वति तत्प्रकारकं ज्ञानम्।
Nyā Ko,
See यथार्थ ज्ञान। (same as यथार्थ ज्ञान)

यथार्थवक्तृ
(yathārthavaktṛ)
one who speaks truth.
(Same as āpta)
Nyā Ko.

यथार्थवक्तृत्व
(yathārthavaktṛtva)
the state of being the speaker of truthful speech.
Tar Saṁ Dī Rā, 349:3;
Tar Saṁ Dī Rā, 315:8

यथार्थानुभव
(yathārthānubhava)
valid or true experience
'तथा च तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वं यथार्थानुभवस्य लक्षणम्।
Tar Saṁ Nyā Bo, 23:15;
Tar Bhā, 188:3

यथार्थानुमिति
(yathārthānumiti)
valid/true inference.
Tat Ci, 1200:7

यम
(yama)
restraining, self control.
A yogic concept, the first of the eight *aṅgas* of *pātañjala* Yoga.
निवृत्तिलक्षणा यमाः।
Nyā Bhū, 588:6,8
अहिंसासत्यास्तेयब्रह्मचर्याऽपरिग्रहा यमाः।
Ibid
तत्र देशकालावस्थाभिरनियताः पुरुषस्य शुद्धि-वृद्धिहेतवो यमाः। *Nyā Bhū, 587:16*
यमः समानमाश्रमिणां धर्मसाधनम्।
Nyā Sū Bhā, 309:4-5

याग
(*yāga*)
a sacrifice
प्रीत्यवच्छिन्नसमन्त्रकद्रव्यत्यागो यागः।
Nyā Pra, 109:15

याथार्थ्य
(*yāthārthya*)
the state of being valid which is capable or fit for producing a volition which generates a result.
फलवत्प्रवृत्तिजननयोग्यत्वम्।
Tar Kar
(Nyā Ko) (see यथार्थत्व)
याथार्थ्यं तु स्वव्यधिकरणप्रकाशावच्छिन्ना या शा विषयता तत्तदनिरूपकत्वम्।
(Nyā Ko)

यावच्छरीरभावित्व
(*yāvaccharīrabhāvitva*)
the state of existing as long as the body exists.
Nyā Sū, 3.2.47

यावद्द्रव्यभावित्व
(*yāvaddravyabhāvitva*)
existing so long as the substance exists. The state of being a counterpositive of the destruction which is produced by the destruction of its locus.
स्वाश्रयनाशजन्यनाशप्रतियोगित्वम्।
Nyā Ko

यावत्
(*yāvat*)
as much as, as many as, as great, as large.
मर्यादार्थको यावच्छब्दः।
Vyu Vā, 15

यावत्त्व
(*yāvatva*)
the state of being that which refers to as many as, as much as, as large, the state of being that which encompasses.
व्यापकत्वम् *Nyā Ko.*

युक्त (योगिन)
(*yukta*)
1) proper,
2) that which is joined. One who has joined his individual self with the Absolute (a *yogin*).
Nyā Kan, 465:9, 466:1-3

युक्तत्व
(*yuktatva*)
the state of being *yukta*
Vā Vā, 74:12

युक्तावस्था
(*yuktāvasthā*)
proper time, proper stage on situation
Nyā Sā, 12:8

युग
(*yuga*)
an age of the universe (world) long time span, time having a long duration.
Pra Pā Bhā, 78:19

युगपत्प्रत्यासन्न
(*yugapatpratyāsanna*)
those having simultaneous occurence.
Tat Ci Gā, 640:1

युगपदवस्थान
(*yugapadavavasthāna*)
simultaneous existance
Pra Pā Bhā, 135:26

युतसिद्ध
(*yu tasiddha*)
that which can exist separately
Pra Pā Bhā, 148:17

युतसिद्धि
(*yutasiddhi*)
both the relata having independent existence.
युतसिद्धिः पृथक्सिद्धिः पृथगवस्थितिरूभयोरपि सम्बन्धिनो परस्परपरिहारेण,
Nyā Kan, 37:1-2 पृथगाश्रयाश्रयित्वम्।
द्वयोरेकस्य वा परस्परसंयोगविभागहेतुभूतकर्मसमवाययोग्यता युतसिद्धिः।
Nyā Kan, 379:3-4
विद्यमानयोः सम्बन्धो युतसिद्धिः।
Sapta Padā, 152:1
असम्बद्धयोर्वर्तमानत्वं युतसिद्धिः।
Nyā Lī Kaṇ, 341:14
असम्बद्धयोर्विद्यमानत्वं युतसिद्धिः पृथगाश्रयाश्रितत्वं वा तदभावस्त्ववयवावयविनोरित्यर्थः।
Upa, 7.2.13.; P. 426

युष्मद्
(*yuṣmad*)
you, second personal pronoun.
NyāKo.

युष्मदस्मदर्थत्व
(*yuṣmadasmadarthatva*)
the state of being the content of the words 'you' and 'I' (second & first personal peronoun).
Śak Vā , 126:1

यूष
(*yūṣa*)
यूषो हि नाम उत्पन्नपाकजानां द्रव्याणां कालविशेषानुग्रहे सति द्रव्यान्तरसंवृक्तानां पाकजोत्पत्तौ यः संयोग स यूषः इति स यूषः इति स चार्थान्तरवदित्यसिद्धो दृष्टान्तः।
Nyā Sū Bhā Vār, 79:2-5

योग
(*yoga*)
a type of primary relationship between a word and its meaning.

1. The expressive relationship which expresses the meaning through its component parts.
   अवयवशक्तिर्योगः।
   Tar Saṁ Dī, 51:18
   शास्त्रकल्पिताऽवयवार्थनिरूपिताशक्तिर्योगः।
   Nyā Si Mu Kir, 315:9
   प्रकृतिप्रत्ययरूपावयवशक्तिर्योगः । यथा कर्त्रादिपदे।
   Nyā Pra, 102:16
2. *Samādhi* in *yoga* system
   योगः समाधिः।
   Nyā Kan, 464:5; Nyā Bhū, 586:2
   इन्द्रियाणि विषयेभ्यः प्रत्याहृत्य इन्द्रियेभ्यो मनः प्रत्याहृत्य साक्षात्कर्त्तव्ये वस्तुनि मनः प्रणिधानं योगः।
   Tar Saṁ Dī Pra, 388:12

योगक्षेम
(*yogakṣema*)
welfare, well-being , aquisition and preservation.
Vyu Vā, 37; Pra Vā, 326:7; Nañ Vā, 189:6; Pa Vā Ra, 211
अनुभवमनुरूध्य वस्तुस्थितिसंगमनम्।
Nyā Ko

योगक्षेमत्व
(*yogakṣematva*)
the state of being an aquisition and preservation.
Kir Va, 57:16

योगज (सन्निकर्ष)
(*yogaja*) (*sannikarṣa*)
yogic contact or relationship (of the knowledge), extraordinary contact, uncommon relationship.
Pra Pā Bhā, 189:11; Maṇ Ka, 28:8

योगजधर्म
(*yogajadharma*)
merit produced by *yoga*
Tar Saṁ Dī Pra, 143:13; Tat Ci, 545; Tat Ci, 853:8

योगरूढ
(*yogarūdha*)
a type of primary word which expresses its meaning through the relationship of *yogarūḍhi* (having) both *avayavaśakti* and *samudāyaśakti*)
शक्तं पद त्रिविधं - योगरूढं रूढं यौगिकं च योगरूढं पङ्कजादिपदम्।
Maṇ Ka, 80:10;
Tar Saṁ Dī Pra, 248:19;
Ś aŚa Pra, 72:3
किञ्चित्पदं योगरूढं - शास्त्रकल्पिताऽवयवार्थाऽन्वित-विशेषभूताऽर्थनिरूपिता शक्तिः योगरूढिः, तन्निरूपकं पदं योगरूढमित्यर्थः।
Nyā Si Mu Kir, 315:12
उभयशक्त्यैकार्थबोधकं योगरूढम्, पङ्कजादि।
Nyā Pra, 103:3
यत्र तु अवयवशक्तिविषये समुदायशक्तिरप्यस्ति तद्योगरूढम्।
Nyā Si Mu, 316:1

योगरूढि
(*yogarūḍhi*)
one type of primary relationship where the word is used in a conventional sense to which the etymological sense also is applicable.
यौगिकार्थ - बुद्धिरूपसहकारिलाभाद्विशिष्टा-र्थोपस्थापकत्वं रूढेः योगरूढत्वम्।
Nyā Si Dī, 59:22
अवयवसमुदायस्मारितपङ्कजनिकर्तृपद्मानां पङ्कजनिकर्तृ पद्ममित्यनुभवोऽवयवसमुदायाभ्यां सम्भूय जन्यते।
Tat Ci Śabda, 635; (Vol.4.pt.3)
शास्त्रकल्पिताऽवयवार्थाऽन्वितविशेष्यभूताऽर्थनिरूपिता शक्तिः योगरूढिः।
Nyā Si Mu Kir, 315:12; Nyā Si Dī, 16:15; Tat Ci, Vol.4.pt.3: 739:7; Pa Vā Ra, 310

योगरूढित्व
(*yoga-rūḍhi-tva*)
the state of being conventional and etymological
Tat Cin Dī 633.16

योगविभाग
(*yoga-vibhāga*)
a technique by which a *sūtra*/unit is dissolved into parts for the convience of interpretation
Pramā Vār 39.3

योगसाधु
(*yoga-sādhu*)
proper to be used (in a sentence)
विशेषणविभक्तिस्तु योगसाधुः।
Nañ Vā P. 190.19

योगाचार
(*yogācāra*)
follower of a particular Buddhist ect.
Nyā Lī Kan 461.14

योगारूढ
(*yogārūḍha*)
a type of *yogin* who has attained the *yoga*.
Tar Mṛ 88

योगिज्ञान
(*yogijñāna*)
knowledge of a *yogin*
भूतार्थभावनाप्रकर्षपर्यन्तजं योगिज्ञानं चेति।
Nyā Bin 1.11; Nyā Lī Pra 476.7

योगिन्
(*yogin*)
a person who has attained yogic powers, who has supernormal powers.

1. अचिन्त्या योगिनां गतिः।
   Powers of a yogin are beyond imagination.
2. The argument put forward to establish existence of *yogin* is as follows -
   किं पुनर्योगिसद्भावे प्रमाणम्? उच्यते परमाणवः कस्यचित्प्रत्यक्षाः प्रमेयत्वात् घटवत्।
   Tar Bhā 170.4; Pad Tat Nir 31.3

योगिनां दृक्
(*yoginām-dṛk*)
intuition of a *yogin*
१. योगिनां गुरुनिर्देशाव्यतिभिन्नार्थमात्र दृक्
Pramā samu 1.6
Tr. the *yogin*'s intuition of a thing in itself unassociated with the teachers instruction is also a type of perception.

योगिप्रत्यक्ष
(*yogi-pratyakṣa*)
perception of a *yogin*.
A *yogin* perceives a thing not in a normal way as other humans perceive. Therfore it is called supernormal perception or yogic perception. It does not involve contact between the object and the sense organ.
योगिप्रत्यक्षं तु देशकालस्वभावविप्रकृष्टार्थग्राहकम्।
Nyā Sā 21.1
Yogic perception is a means to know objects far away in space, time, state
Nyā Bhū 87.10, 172.15; Tat Cin P. 545

योग्य
(*yogya*)
compatible
Tat Bhā 56.2; Pad Man 20.13; Tat Cin P. 372, 857.9

योग्यता
(*yogyatā*)
compatibility, one of the factors facilitating understanding of sentence meaning.

१. It is a relation between two objects
   एकपदार्थेऽपरपदार्थसम्बन्धः योग्यता। यथा जलेन सिञ्चति। अत्र जलस्य करणतया सेचनेऽन्वयः।
   Nyā Pra 114.19; Nyā Si Muk 346-47.4
२. बाधकप्रमाविरहो योग्यता। तेन वह्निना सिञ्चति इत्यत्र नान्वयबोधोऽयोग्यत्वात्।
   Tar Kā P.85
३. एकपदार्थेऽपरपदार्थसंसर्गो योग्यता।
   Tar Kau 45.11
४. बाधाभावो योग्यता।
   Tar San Nyā Bo. 53.8
५. आकाङ्क्षायोग्यता सन्निधिश्च वाक्यार्थज्ञानहेतुः। अर्थाबाधो योग्यता।
   Tar Saṅ P. 52
६. बाधकप्रमाविरहो योग्यता। सा चेतर पदार्थ-संसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्व - प्रमाविशेष्यत्वाभावः।
   Tat Din Śab. 262.1
७. बाधकप्रमाणाभावोऽन्वयविरोधिरूपविरहो वा योग्यता।
   Tat Cin 1459.15
८. योग्यता च अन्वयव्याप्तौ पक्षातिरिक्ते साध्यसहचरितसाधनवद्वृत्तित्वम्।
   TatDīp Rām Rud, 281.19
९. वक्तृज्ञातृ वाक्यार्थाबाधो हि योग्यता।
   Tat Cin Prā. P. 347

१०. व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकस्तादृशाभावो घटादौ अबाधित एवेति वा योग्यता।
Śak Vā 141.4

११.एकपदार्थेऽपरपदार्थवत्त्वं योग्यता इति मते संशयनिश्चयसाधारण तत्तज्ज्ञानत्वावच्छिन्नं शाब्दधीहेतुः। बाधनिश्चयाभावो योग्यता इति नवीनमते तु स्वरूपसत्येव योग्यता तद्धेतुरिति दिक्।
Tar Dīp Pra 255.20

१२.अनन्वयनिश्चयविरहो योग्यता इत्याचार्याः।
Tat Cin. P. 1885

१३. तत्र अन्वयप्रतियोगिपदार्थयोः परस्परसंसर्गाबाधो योग्यता इति केचित्। एकपदार्थे अपरपदार्थसंसर्ग एव योग्यता, तस्याः संशयसाधारणं ज्ञानं कारणमिति नवीनाः। *Maṇ Kan 70.4*

१४. बाधकमानाभावो योग्यता। *Nyā Lī Pra 528.9*

१५. योग्यता च गुणात्यन्ताभावाभावः।
Tar Bhā 25.2; Tat Cin 857.10; Nyā Rat 11.12, 115.6, 10.3; Tar Bhā 88.2; Nyā Lī 410.2, 192.2; Śak Śak Pra. 11.4

योग्यताज्ञान
(yogyatājñāna)
cognition of compatibility,
Pad Maṇ 29.10;
Tar Dī Rā Ru 342.2, 342.6;
Śak Vā 73.1

योग्यतात्व
(yogyatā-tva)
the state of being *yogyata*
Tat Cin P. 1359./818.5

योग्यताविरह
(yogyatā-viraha)
absence of compatibility
Nyā Rat 154.3; Nyā Kus 242.2;
Tar Dīp Rā Rud 341.3;
Śak Vā 145.8

योग्यत्व
(yogyatva)
1. The state of being compatible
2. In the context of perception it is defined as-
लौकिकसाक्षात्कारविषयनिर्विकल्पकान्यतरत्वम् अतीन्द्रियजातिशून्यत्वं वा।
NyāSi Mu Kir. 99.18; Din 98.9

योग्यधर्मिन्
(yogyadharmin)
a compatible object
Tat Cin 458

योग्यविशेषगुण
(yogya-viśeṣa-guṇa)
a particular quality to be compatible of something (perception etc.)
Nyā Lī 186.3

योग्यसंनिकर्ष
(yogya-sannikarṣa)
relation (संन्निकर्ष) with a compatible object.
योग्यसंनिकर्षादिति योग्यविषयनिष्ठसंनिकर्षात्।
Tat Cin Rah 580.10

योग्यानुपलब्धि
(yogyānupalabdhi)
non-cognition of a thing which is compatible to be perceived.
Naiyayikas do not accept अनुपलब्धि as an independent means of perception. However, the mīmānnisakas accept it as such -

१. अभावप्रत्यक्षसामग्रीविशिष्टप्रतियोग्यनुपलब्धिः।
(Nyā Ko) Tar Dip Pra.

२. प्रतियोगितद्व्याप्येतरप्रतियोग्युपलम्भकयावत्सामग्री-विशिष्टप्रतियोग्युपलम्भाभावः। *(Nyā Ko)*

३. ननु अनुपलब्धेः प्रमाणान्तरत्वानङ्गीकारे घटोपलब्धिदशायां तदभावप्रत्यक्षापत्तिः, मम मते तु

अनुपलब्ध्यात्मकप्रमाणान्तराभावात् नापत्तिरिति भाट्टशङ्कां परिजिहीर्षुः योग्यानुपलब्धेः इन्द्रिय-सहकारित्वमात्रेणैव निर्वाहः अतिरिक्तप्रमाणत्वं न संभवति।

Tar Dīp Pra 142.2

Mimā ṁsakas view is expressed in the following argument.

नन्वभावग्रहो नेन्द्रियात्, किन्तु योग्य अनुपलब्धेः तदुपलम्भे तदभावाग्रहात्।

Tat Cin P. 673; Nyā Rat 51.2;
Tat Cin 684.4; Abhā Vā 185.4

४. योग्यानुपलब्ध्याऽभावः प्रत्यक्षः।

Tar Kā 63.20; Kir 57.15; Tat Cin 856.2, 107, 733.4; Tat Cin Gāda 674.15;
Tat Cin Dī 540.10; Rat Kir Nib 108.23

योग्योपाधि

(yogyopādhi)

a compatible condition

Tat Cin 107.

योग्यानुपलम्भ

(yogyānupalambha)

non apprehension of an object which is fit to be perceived.

योग्यानुपलम्भो ह्यभावप्रमां प्रति कारणं, न त्वभावज्ञानमात्रं प्रतीति भावः।

Nyā Lī Kaṇ 415.5; Kir 67.21

A compatible condition

Tat Cin 107.

योनिज

(yonija)

born out of womb, a kind of body, produced by mixing of sperm & blood.

शुक्रशोणितयोः परस्परमेलनजन्यम्।

Nyā Pra, 52.11

(Nyā) Tar Saṁ Din; (Nyā Ko) Si Ca

यौगपद्य

(yaugapadya)

simultaneity

१. अनेकेषाम् एकक्षणसम्बन्धो यौगपद्यम्।

Sapta Pada 95.3

Relation of many with same moment

Nyā

२. एककालवृत्तित्वम्।

Nyā Ko,

3. एककालोत्पत्तिकत्वम्।

Tar Bhā 30.2; Nyā Lī 198.2;
Pad Vā Ra 744.9; Man Ka 70-72.13;
Pra Pā Bhā 135.20, 76.6;
Nyā Rat 178.13;
Tar Dīp Rām Rud 312.9; Kir 116.6

यौगिक

(yaugika)

a word which denotes meaning expressed by its coustituents, showing coustituent meaning.

१. पदं तावच्चतुर्विधम्। यौगिकं, रूढम्, योगरूढम्, यौगिकरूढं चेति। योगः अवयवशक्तिः। तन्मात्रेणैव अर्थप्रतिपादकम् आद्यम्। यथा पाचकादि पदम्।

Tar Dīp Pra 248.17

२. पाचकादिपदं योगार्थे पाककर्तरि शक्तम्।

Tar Ka 88

३. रूढश्च लक्षकश्चैव योगरूढं च यौगिकम्।
तच्चतुर्द्धा परै रूढयौगिकं मन्यतेऽधिकम्।।

Śak Śak Pra 72.3

४. योगलभ्यतावच्छेदकम्।

Delimitor of the meaning objtained through constitueuts.

Tat Cin Gada. 634.9

५. योगलभ्यार्थमात्रस्य बोधकं नाम यौगिकम्।

Śak Śak Pra 187.5

६. अवयवमात्रशक्तिकं यौगिकम्, कर्त्रादि।

Nyā Pra 103.2

७. यत्र अवयवार्थ एव बुध्यते तद्यौगिकम्, यथा पाचकादिपदम्।
Nyā Si Muk 315.2

८. शास्त्रकल्पिताऽवयवार्थनिरूपिता शक्तिर्योगः। तन्निरूपकं पदम् यौगिकमित्यर्थः।
Nyā Sid Muk Kir 315.9

९. यौगिकं कृत्तद्धितसमासभेदात्रिविधम्। कृदन्तं, पावकपाचकादि, तद्धितान्तम् औपगवादि। ...
Mani Ka 82.4

१०. अवयवशक्तिमात्रेण अर्थप्रतिपादकम्।
Tar Saṅ Nī.

११.यन्नाम स्वान्तर्निविष्टशब्दानां योगलभ्यस्यैव यादृशार्थस्यान्वयबोधं प्रति हेतुः तन्नाम तादृशार्थे यौगिकम्।
Nyā Ko

यौगिकार्थ
(*yaugikārtha*)
meaning of a word denoted by its constituents.
Tat Cin. Śab. 593.2

यौगिकत्व
(*yaugika-tva*)
the state of being *yaugika*.
Tat Cin Gādā 631:1

यौगिकरूढ
(*yaugikarūḍha*)
a word which denotes its constituent meanings as well as its colloquial meaning independent of each other e.g. the word उद्भिद् denotes trees etc by its constituent meaninge i.e. उद् + भिद. It also denotes a particular kind of sacrifice by convention.

१. यत्र तु यौगिकार्थरूढ्यर्थयोः स्वातन्त्रेण बोधः, तद्यौगिकरूढम्। यथा उद्भिदादिपदम्।
Nyā Si Muk 318-319.3

२. उद्भिदादिपदं यौगिकं तरुगूल्मादेः, रूढं यागविशेषस्य वाचकम्। *Tar Lā 89*

३. योगशक्त्या समुदायशक्त्या च परस्परसहायेन विभिन्नार्थप्रतिपादकं चतुर्थम्। यथा उद्भित्पदम् योगेन तरुगुल्मादेः, रूढ्या तु यागविशेषस्य वाचकम्।
Tar Dīp Pra 248.20

४. रूढियोगाभ्यां स्वातन्त्र्येण अर्थबोधकं यौगिकरूढम् उद्भिदादियोगेन वृक्षादिकं रूढ्या यज्ञविशेषं बोधयति।
Nyā Pra 103.12

५. शास्त्रकल्पितअवयवार्थ समुदायार्थयोः स्वतन्त्रशक्तिः यौगिकरूढिः, तान्निरूपकं पदं यौगिकरूढमित्यर्थः।
Nyā Si Muk Kir 315. 13

६. अत्र यौगिकं च तद्रूढं च इति व्युत्पत्तिरनुसंधेया।
(Nyā Ko) Nī.

७. योगेन रूढ्या च परस्परसहकारेण अर्थप्रतिपादकम्।
Nyā Ko Nyā Si Muk; Nīl.

यौगिकरूढि
(*yaugika-rūḍhi*)
the state of denoting constituent as well as conventional meaning.
शास्त्रकल्पित - अवयवार्थसमुदायार्थयोः स्वतन्त्रशक्तिः यौगिकरूढिः।
Nyā Si Muk Kir 315.13

योगार्थ
(*yogārtha*)
meaning of the constituents.
Śab Śak Pra 185.5, 173.4; Pad Vāk Rat 257; Tar Dīp Ram 335.8

र

रक्त
(*rakta*)
red, One of the colours
(रूपं) शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात् सप्तविधम्।
Tar Saṅ 14; Śab Śak Pra 452.5; Pad Maṇ 13.19

रजस्
(*rajas*)
one of the properties of the world.
दु:खस्वभावं रजः।
Nyā Mañ

रस
(*rasa*)
taste one of the twenty four qualities, that which is perceived by tongue is called रस. It is of six types. It resides in the earth with all six varieties. In water only sweet taste resides.

१. रसनाग्राह्यो गुणो रसः। स च मधुर-आम्ल-लवण-कटु-कषाय-तिक्त भेदात् षड्विधः। पृथिवी जलवृत्तिः।
Tar Saṅ 15

२. रसनेन्द्रियग्राह्यो विशेषगुणः। पृथिवीजलवृत्तिः।
Tar Bhā 155.1

३. रसनग्रहणो योऽर्थः स रसः।
(Nyā Ko) Prapā Bhā Upa on 3.1.1

४. रसनामात्रग्राह्यजातिमान्रसः।
Tar Kau 9.12

५. रसस्तु रसनाग्राह्यो मधुरादिरनेकधा।
Nyā Sid Muk 388.3-4

६. रसनेन्द्रियग्राह्यवृत्तिगुणत्वव्याप्यजातिमान् रसः।
Nyā Pra 66.3

७. रसवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमान्।
Upa on 7.1.6

८. रसः षड्विधो मधुरादिः।
Pra Pā Bhā 32.2.12

९. रसः रसनग्राह्यः पृथिव्युदकवृत्तिः। जीवनपुष्टिकारोग्यनिमित्तम्। रसनसहकारी। मधुराम्ललवणतिक्तकटुकषायभेदभिन्नः।
Pra Pā Bhā 116.8

१०. रसत्वजातियोगी रसनग्राह्यो गुणो रसः।
Śab Sak Pra 70.22; Pad Maṇ 16.4; Tat Dīp Pra 104.3; Nyā Lī Pra 472.15

रसग्राहक
(*rasagrāhaka*)
the sense organ perceiving taste, i.e. tounge.
Tar Dīp Pra 71.11

रसत्व
(*rasatva*)
the state of being taste
रसनेन्द्रियमात्रजन्यसाक्षात्कारविषयजातिः। तादृशजातिमत्त्वञ्च रसत्वम्। रसनेन्द्रियग्राह्यगुणत्व-व्याप्यजातिमत्त्वं रसत्वम्।
Upa on Nyā Sī 7.1.6
It is the state of being an object perceivable only by the tongue.
Pad Man 16.17

रसन
(*rasana*)
tongue, one of the sense organs

१. रसोपलब्धिसाधनम् इन्द्रियं रसनं जिह्वाग्रवर्ती। तच्चाप्यं रसवत्त्वाद्रसवत्वं च रूपादिषु पञ्चसुमध्ये रसस्यैव अभिव्यञ्जकत्वात् लालावत्।
Tar Saṅ, Tar Bhā 127.5

२. गुडे मधुरो रसः इति रसप्रत्यक्षासाधारणं कारणम्।
(Nyā Ko) Tar Kau

३. रसग्राहकं महदिन्द्रियम्।
Nyā Mañ (Nya Ko)

रसना
(*rasanā*)
tongue femi. of रसन
Same as रसन
Pad Maṅ 22.18

राग
(*rāga*)
attachment, it is one of obstacles in the true understanding of the universe. It originates because of false desires.

१. संकल्पनिमित्तत्वाच्च रागादीनाम्।
Nyā Sū 4.1.68
२. मिथ्यासङ्कल्पेभ्यो रञ्जनीय कोपनीय मोहनीयेभ्यो राग-द्वेषमोहाः उत्पद्यन्ते।... इतरेतरनिमित्ता च रागादीनामुत्पत्तिः। सर्वमिथ्यासङ्कल्पानां तत्त्वज्ञानादनुत्पत्तिः।
Nyā Sū Bhā 285.5 on ward, 286.4
३. रागं हि नित्यसुखात्मीयदर्शनाभिनिवेशाक्षिप्तं सास्रवधर्मविषयमाहुः।
Pra Vār 51.9
४. अशक्तिलक्षणो रागः।
Nyā Bin 586.8
५. There are three types of *doṣas*, namely, राग, द्वेष, मोह
अनुकूलेष्वर्थेष्वभिलाष लक्षणो रागः।
राग is that which is desire to posses the desired thing. Nyā Mañ 70.29
६. पुनःपुनर्विषयरञ्जनेच्छा रागः।
Pra Pā Bhā 250.5
७. रागः इच्छा।
Tar Dip 64.11 It is desire
८. रागः कामः।
Nyā Pra 154.9
९. उत्कटेच्छा रागः।
Nyā Pra 74.18
१०. विषयाभिलाषो रागः।
Nyā Pra 110.5
११. आसक्तिलक्षणो दोषः।
Vāt. 4.1.3

रागप्राप्त
(*rāgaprāpta*)
obtained by attachment /desire
Tar Dīp Rā Rud 93.6

रात्रि
(*rātri*)
night
१. निरस्तैतद्वीपवर्तिरविरश्मिजालः कालविशेषो रात्रिरित्युच्यते। *Kir 13.13*
It is a particular segment of time, in which the rays of the sun on the earth are set a side.

रासनप्रत्यक्ष
(*rāsana-pratyakṣa*)
perception of taste by tounge
Pad Maṇ 22.18

रीति
(*rīti*)
convention, custom
Ākhyā Vā 32.4; Pad Tat Nir 79.7; Tat Cin. 879.2

रुचि
(*rīci*)
liking
प्रीतिजनकता। *Nyā Ko*

रूढ
(*rūḍha*)
conventional
१. रूढिः समुदायशक्तिः। तन्मात्रेणार्थप्रतिपादकम्। यथा गवादिपदम्।
Tar Dīp Pra 248
The word which denotes a particular meaning collectively i.e. It does not expect meaning of its constitutents.
२. Tar Kā 88 विप्रादिपदं शक्त्या ब्राह्मणवाचकम्।
३. समुदायमात्रशक्तिकं रूढम्। यथा विप्रादिपदम्।
Nyā Pra 102.20
४. यत्रावयवशक्तिनिरपेक्षया समुदायशक्त्या बुध्यते तद्रूढम्। यथा गोमण्डलादिपदम्।
Nyā Si Muk 315.2-3
५. शास्त्रकल्पिताऽवयवार्थभानाभावे समुदायार्थनिरूपितशक्तिः रूढिः. तन्निरूपकं पदं रूढमित्यर्थः। *Nyā Si Mu Kir 315.10*

६. रूढशक्तिमात्रेण अर्थप्रतिपादकं पदम्।
(Nyā Ko) Nī 19
७. यन्नाम यादृशार्थे सङ्केतितमेव न तु यौगिकमपि तद्रूढम्। *Nyā Ko*
८. प्रकृतिप्रत्ययार्थमनपेक्ष्य समुदायशक्त्यार्थबोधकम्।
Nyā Ko
९. रूढं धेन्वादिपदम्। औणादिकप्रत्ययानां शक्तत्वे मानाभावात्। धानकर्मगोत्वावच्छिन्ने विशिष्ट-शक्तिस्वीकारात्। *Maṇi Ka 82.1*

रूढयौगिक
(rūḍhayaugika)
same as यौगिकरूढ
... परै रूढयौगिकं मन्यतेऽधिकम्।
Śab Śak Pra 72.4

रूढलक्षणा
(rūḍhalakṣaṇā)
same as निरूढलक्षणा

रूढार्थ
(rūḍhārtha)
conventional meaning
Pramā Vār 598.4

रूढि
(rūḍhi)
convention
१. समुदायशक्ती रूढिः।
Tar Dīp 51:18
Nyā Pra 102.16
२. शास्त्रकल्पितावयवार्थभानाभावे समुदायार्थनिरूपितशक्तिः रूढिः।
Nyā Si Mu Kir 315.10

रूढिक
(rūḍhika)
same as *rūḍha*, i.e. conventional
यथागमितयोगमनपेक्षितरूढिकम्। यथाकश्यपतन-याघृतिहेतुरयम्,त्रिनयनतनययानसमाननामधेयवान् तत्केतुमत्वात्।
Nyā Rat 231.8

रूढिपूर्विका
(rūḍhipūrvikā)
same as रूढिलक्षणा
यत्र रूढ्यर्थ सम्बन्धिनि तात्पर्यं मानान्तरादवधार्यते तत्र रूढि पूर्विका लक्षणा।
a meaning related with conventional meaning. *Tat Cin Śab 712.12*

रूढिलक्षणा
(rūḍhilakṣaṇā)
same as निरूढलक्षणा
Nyā Ko

रूढ्यर्थ
(rūḍhyartha)
meaning of *rūḍhi*, conventional meaning.
Śab Śak Pra 173.4; Pad Vāk Rat 257

रूढ्यर्थतावच्छेदकता
(rūḍhyartha-tā-vacchedaka-tā)
the state of being delimitor of the state of being convention all meaning.
Same as वाच्यता *Tat Cin Gādā 634.1*

रूप
(rūpa)
one of the twenty four *guṇas*, form or colour.It exists until the substance exists. It is pereceived only through eyes.
